**संस्कृतवार्ता:**

**दिनाङ्क :-31.12.2024**

**प्रात: - 06:55**

**भारतीय-अन्तरिक्ष-अनुसन्धानसङ्घटनम्**

**भारतीय-अन्तरिक्ष-अनुसन्धानसङ्घटनम् गतरात्रौ श्रीहरिकोटातः उपग्रहद्वयं सफलतया प्रक्षेपितम्। यद्धि अन्तरिक्षयानानां डॉकिंग् इति संयोजनं अनडॉकिंग् इति वियोजनं करिष्यति। येन भारतदेश: विश्वस्य चतुर्थः देशः अभवत् यो हि उपलब्धिम् इमं प्राप्तवान्। इस्रो इत्यस्य (पीएसएलवी) इति वॉरहॉर्स-रॉकेट-पोलर इति उपग्रहप्रक्षेपणयानं उपग्रहद्वयं एसडीएक्स01 एसडीएक्स02 इति षट्सप्तत्यधिक-चतुश्शतं कि.मी. परिमितायां वर्तुलाकार-कक्षायां स्थापयिष्यति। स्पेडेक्स इति अभियानं भारतस्य भविष्यत्कालिकानाम् अन्तरिक्ष-अन्वेषण-प्रयासानां कृते आधारशिलात्वेन भविष्यति इति अपेक्षा अस्ति। 'भारतीया: चन्द्रमसि' इति लक्ष्यमधिकृत्य भारतीय-अन्तरिक्ष-स्थानकं चन्द्रमस: अन्तरिक्षयात्रिणः अवरोहणे अपि समर्था: भविष्यन्ति इत्यपेक्षते। केवलं अमेरिका- रूस-चीनदेशाः एव अन्तरिक्षडॉकिंग इत्यस्यां प्रौद्योगिक्यां निपुणतां प्राप्तवन्तः । अभियानस्यास्य मुख्य-उद्देश्यं अन्तरिक्षयानेषु विद्युत्शक्तिहस्तान्तरणस्य प्रदर्शनमपि वर्तते।**

**भारतस्य वैश्विकी वृद्धि:**

**भारतेन अत्युत्तम-लक्ष्यं सम्प्राप्य वैदेशिक-मुद्राविनिमय-कोश: सप्तशत-बिलियन -यू.एस. डॉलर-परिमित: सञ्जात:। अनेनैव सह वैश्विकस्तरे भारतस्य स्थानं चतुर्थं सञ्जातम्। आहत्य गतदशाब्दे चतुर्दशत: चतुर्विंशति:काले प्रत्यक्ष-वैदेशिकविनिवेश: प्रायश: नवोत्तर-सप्तशत बिलियन डॉलरात्मकस्य सञ्जातोऽस्ति। अस्मत्वार्ताहरेण प्रोक्तं यत् वैश्विक-प्रतिस्पर्धीति सूचकाङ्के चतुर्दशोत्तर-द्विसहस्रतमे वर्षे भारतस्य स्थानं यत्र एकसप्ततितमम् आसीत् तत्रैव अष्टादशोत्तर-द्विसहस्रततमे वर्षे स्थानमिदं वरीवर्ध्य एकोन-चत्वारिंशत्तमम् अभवत्। इदं हि आधारभूत-संरचनां आपणस्य स्थितिं, नवाचारे वृद्धिञ्च दर्शयति।**

**भारत-नेपाल-सैन्य-अभ्यासः**

**भारत-नेपाल-सैन्य-अभ्यासस्य 'सूर्यकरण'-इत्यस्य अष्टादशतमं संस्करणम् अद्य नेपाल-देशस्य रूपनदेही-नगरस्य सलझण्डी-नगरे आरभ्यते । बटालियन-स्तरीयः संयुक्तसैन्य-अभ्यासः अरण्ययुद्धे, समाह्वानपूर्णे भूगोले आतङ्कवाद-विरोधीत्यादिषु च आपदप्रबन्धने मानवीयसहायतायां केन्द्रितः अस्ति। भारतीयसेनायाः एकादश-गोर्खा-राइफल, नेपालीसेनायाः श्रीजङ्गबटालियनः इत्येतौ सप्ताहद्वयात्मके प्रशिक्षणे भागं गृह्णन्ति।**

**मोदी - विनिर्माणक्षेत्रम्**

भारतस्य विनिर्माणक्षेत्रे अस्मिन् वर्षे उल्लेखनीयवृद्धिः अभवत्, येन तस्य वैश्विकशक्तिकेन्द्रे परिवर्तनं रेखांकितम् क्रियते। नरेन्द्रमोदी प्रशासनेन विगतेषु दशवर्षेषु आर्थिकसामाजिकविदेशनीतिपरिकल्पनाः कार्यान्विताः। एतैः उपक्रमैः भारतस्य वैश्विकशक्तिरूपेण उदये योगदानं कृतम् अस्ति।

**रूस यूक्रेन-बन्दीः**

संयुक्त अरब अमीरातस्य (यू.ए.ई) इत्यस्य मध्यस्थतायां रूस-युक्रेन-देशयोः शतशः युद्धबन्दीनां आदान-प्रदानं जातम्। रूसदेशस्य रक्षामन्त्रालयेन उक्तं यत्, बद्धेषु सार्धैक शतं यावत् सैनिकानाम् आदानप्रदानं कृतम्।

**हॉकी-क्रीडा**

हॉकी-इण्डिया-लीग इत्याख्यायां क्रीडामालायां राऊरकेलायाः बिरसामुण्डा-हॉकी-क्रीडाङ्गणे गतसायं यू.पी. रूद्राज् इत्यनेन दलेन वेदान्त-कलिंगा-लांसर्स इत्येतं दलं त्रिणी-एकं इत्यंकान्तरालेन पराजितम्। अद्य राउरकेलायां दिल्ली एस.जी.-पाइपर्स-दलं हैदराबाद-तुफान दलं सम्मुखी करिष्यति। क्रीडारम्भः सपाद-अष्टवादने भविष्यति।

।।इति वार्ताः।।